श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी

# श्रीजगन्नाथज्योतिः

(A Peer-reviewed Research Journal of Indology)

ISSN – 2347-5889 | Vol. - LXVII (67) | Year-2024

Dt- 07-11-2023

अयि ! सुरभारतीसमुपासनैकचित्ताः, शास्त्रतरङ्गायितहृदयाः,

शास्त्राणां यथासम्प्रदायमध्ययनाध्यापनाय तत्रान्तर्निहितगूढतत्त्वपरिप्रकाशनाय जगन्नाथसंस्कृतेः सूक्ष्मेक्षिकया परिशीलनाय तत्रत्यं वैशिष्ट्यं च ख्यापनाय प्रतिष्ठापितोऽयं विश्वविद्यालयः कृत्स्नेऽपि राष्ट्रे स्वकीयं विशिष्टं स्थानं बिभर्त्ति । विश्वविद्यालयेऽस्मिन् अहर्निशं सारस्वतसपर्या प्रचलति । तदङ्गत्वेन अधीतस्य विषयस्य पुनरीक्षणाय तत्र च अनुसन्धानदृष्टिं निक्षेपणाय विश्वविद्यालयेनानेन वार्षिकी काचित् शोधपत्रिका **"श्रीजगन्नाथज्योतिः"** इत्याख्या प्रतिहायनं प्रकाश्यते । अस्मिन्नपि हायने सेयं पत्रिका विद्वत्तोषिणी बोभूयतामिति मनसि निधाय अयमुपक्रमः । अतो गुणगणगरिष्ठा विद्वत्तल्लजाः सादरमत्र निवेद्यन्ते यत् स्वज्ञाननवनीतसारं निष्पीड्य अनुसन्धानपरकं लेखं यदि प्रेषयन्ति चेत् ग्रन्थाकारमापन्नं भवतां ज्ञानं नूनं समाजकल्याणाय अग्रिमशोधसम्भावनाय सुरभारतीसेवायै कल्पिष्यत इति ।

**अन्तिमदिनाङ्कः – ३१-१२-२०२३**

## ध्यातव्याः अंशाः –

- शोधलेखः संस्कृतभाषया आङ्ग्लभाषया वा स्यात् ।
- A4 पत्रप्रारूपे ७ तः १० पुटाभ्यन्तरे स्यात् ।
- संस्कृतभाषया शोधपत्राय युनिकोड् (Arial Unicode) आङ्ग्लभाषया शोधपत्राय Times New Roman वर्णस्वरूपं (font) निर्दिष्टं वर्त्तते ।
- शोधपत्रे एते बिन्दवः अवश्यं भवेयुः –
    - शीर्षकम् (Font- 16)
    - शोधपत्रसारांशः (Font -12/ Italic)

- कुञ्जिशब्दाः (Font -12/ Bold)
- प्रस्तावना (Font -13)
- मुख्यविषयः (Font-13)
- निष्कर्षः (Font-13)
- प्रतिपुटं पादटिप्पणी (Font-09)
- परामृष्टाः / सन्दर्भग्रन्थाः (MLA 6th edition प्रारूपेण) (Font-09)

पत्रिकायामस्यां प्रकाशितः प्रकाश्यमानो वा शोधलेखः **प्रकाशकः – श्रीजगन्नाथज्योतिः** इत्यस्य सत्त्वाधिकारे भवति । प्रकाशकस्य अनुमतिं विनां प्रदत्तं शोधपत्रम् अथवा शोधपत्रांशम् अन्यत्र प्रकाशयितुं न शक्यते ।

- शोधपत्रं समीक्षकाणां सहमत्यैव प्रकाशयिष्यते ।
- carssjsupuri@gmail.com अस्मिन् अणुसंकेते (ई-मेल्) शोधपत्रम् उभयविधं (Word & PDF) प्रेषणीयम् ।
- विशेषजिज्ञासाशमनाय अनया M-9939622062 संख्यया वाग्व्यवहारः साध्यः।

डा.प्रियव्रतमिश्रः

डा.निरञ्जनकरः

सम्पादकौ